# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| कक्षा-तत्त्वाचार्य (M.Phil) (SEM-1) | प्रश्नपत्रम् – 2 | गुणाः –70 |
| विषयः – ज्यौतिषशास्त्रम् | (New & Old) | समयः-11:30 तः 2:30 पर्यन्तम् |
| दिनाङ्कः –10/10/2019 | सन्दर्भग्रन्थः – जातकतत्त्वम् | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां लिखतु।** ५

१ क्षीणेन्द्वर्कयमारराहुशिखिनः पापास्तन्मात्रयुतोबुधश्च
मन्दज्ञौ क्लीबौ चन्द्राच्छौ स्त्रियो शेषाः नराः।
चन्द्रार्केज्याः सात्त्विका ज्ञाच्छौराजसौ शेषास्तामसाः
मन्दार्काराः शुष्काश्चन्द्राच्छौ सजलौ जलर्क्षगौ सेज्यौ च॥

२ षष्ठेशे माने खेशे मन्दयुते केन्द्रे दासान्वितः।
कर्मेशांशेशे मन्दे षष्ठ्पसम्बन्धे बहुदासान्वितः॥

**प्रश्न २ अधोलिखितयोः कस्यचित एकस्य उपरि निबन्धं लिखतु।** १०

१ आजीविकायाः विचारः।

२ नालवेष्टितयोगः।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां कुरुत।** ५

१ अंशादस्ते भौमे स्त्री विकलाङ्गी।
ज्ञशिखिनौ लग्ने स्त्री रोगार्ता॥

२ जीवेऽङ्गेऽथ मन्दे सोत्थेराहौ माता न जीवति।
सोत्थेऽस्तेर्के लग्ने भौमे माता न जीवति।

**प्रश्न ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु।** १०

१ कुष्ठयोगः

२ पुत्रोत्पत्तियोगः

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां कुरुत।** **५**

१ सुते चन्द्रे गुरौ कोणे खे भौमेदीर्घायुः।
रन्ध्रेशे पापे लाभेऽल्पायुरन्यथा दीर्घायुः॥

२ लग्नेधर्मदृष्टे लग्नपे केन्द्रे महादानशीलः।
दानेशे सिंहासने खाङ्गपदृष्टे महादानशीलः॥

**प्रश्न ६ अधोलिखितयोः कस्यचिद् एकस्य उपरि निबन्धं लिखतु।** **१०**

१ फांसीतः मृत्युयोगः

२ नृपतुल्ययोगः

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां कुरुत।** **५**

१ सुनफायां राजा तत्समो धीधनख्यातिभांश्च
अनुफायां प्रभुः शीलवान् ख्यातो नीरोगी।
दुरुधरायां धनवाहनाढ्योत्पन्नभोग सुखभुक्
केमद्रुमे मलिनदुःखितनीचनिःस्वो नृपजोऽपि

२ सोत्थेराहुमन्दौ कुनखी दक्षकरेघाती वायुरोगी
सोत्थेऽर्के वा भौमेऽस्थिभंगो विषभयवह्निचिह्नम्।
खलामृतिगा सव्रणंगुह्यं भगन्दरादि रोगी च
लग्नेशे रन्ध्रे क्रूरयुतदुष्टेऽग्निमांद्यदद्रुकण्डुपीडाश्वित्री॥

**प्रश्न ८ अधोलिखितयोः कस्यचिद् एकस्य उपरि निबन्धं लिखतु।** **१०**

१ मिश्रविवेकाध्यायस्य सारांशः

२ भावानुसारदशाफलम्

## संयुक्तान्वितिः

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखन्तु।** **१०**

१ ग्रहाः अधिशत्रवः कदा भवन्ति?

२ शत्रु+मित्र = किम्?

३ लग्ने शनिः, पञ्चमसप्तमनवमभावे भौमश्चेत् कः योगः जनयति?

४ लाभस्थानं वा लग्नेशः पापग्रहेण सह सम्बन्धं करोति तदा कः योगः जनयति?

५ मंगलस्थितस्थानात् तृतीयस्थाने पापग्रहः भवति चेत् भ्रातृसुखकारकं भवति न वा?

६ षष्ठस्थानस्य स्वामी यदि बलवान् भवति चेत् शत्रुनाशकयोगः भवति न वा?

७ षष्ठे स्थाने पापग्रहाः एवं लग्नेशः षष्ठे व षष्ठेशः लग्ने भवति चेत् पीडां करोति न वा?

८ यदि लग्नेश एव सप्तमेशस्य परस्परशत्रुता भवति चेत् जातकस्य कः शत्रुः भवति?

९ चन्द्रग्रहातः सप्तमस्थाने भौमशनिशुक्रेण सह भवति चेत् कः योगः भवति?

१० भौमसूर्यद्वौऽपि अष्टमस्थाने भवतः तदा कः योगः भवति?

११ शनिमंगल व द्वितीयेशः यदि लग्नस्थाने भवति चेत् कः योगः भवति?

१२ यदि पापग्रहस्य राशौ चन्द्रस्थितः भवति तं भौमः व सूर्यग्रहः पश्यति तदा कः योगः जनयति?

१३ नवमस्थाने एकादशस्थानयोः स्वामी योगं करोति तदा मनुष्यः भाग्यवान् भवति न वा?

१४ लग्नतृतीयपञ्चमस्थाने सूर्यादिसर्वेग्रहाः भवन्ति चेत् कः योगं जनयति?

१५ तरुण्याः कुण्डल्यां यदि, सप्तमस्थाने मिश्रितग्रहाः भवन्ति, चेत् पुनर्विवाहयोगकारकाः भवन्ति न वा?